# શ્રી શિવપંચાક્ષર સ્તોત્ર

નાગેન્દ્રહારાય ત્રિલોચનાય
ભસ્માંગરાગાય મહેશ્વરાય ।
નિત્યાય શુદ્ધાય દિગંબરાય
તસ્મૈ 'ન' કારાય નમઃ શિવાય ॥ ૧ ॥

મંદાકિની સલિલ ચંદન ચર્ચિતાય
નંદીશ્વર પ્રમથનાથ મહેશ્વરાય ।
મંદારપુષ્પ બહુપુષ્પ સુપૂજિતાય
તસ્મૈ 'મ' કારાય નમઃ શિવાય ॥ ૨ ॥

શિવાય ગૌરીવદનાબ્જવૃંદ
સૂર્યાય દક્ષાધ્વરનાશકાય ।
શ્રીનીલકંઠાય વૃષધ્વજાય
તસ્મૈ 'શિ' કારાય નમઃ શિવાય ॥ ૩ ॥

વસિષ્ઠ કુંભોદ્‌ભવગૌતમાર્ય
મુનીન્દ્રદેવાર્ચિતશેખરાય ।
ચંદ્રાર્કવૈશ્વાનર લોચનાય
તસ્મૈ 'વ' કારાય નમઃ શિવાય ॥ ૪ ॥

યક્ષસ્વરૂપાય જટાધરાય
પિનાકહસ્તાય સનાતનાય ।
દિવ્યાય દેવાય દિગંબરાય
તસ્મૈ 'ય' કારાય નમઃ શિવાય ॥ ૫ ॥

પંચાક્ષરમિદં પુણ્યં યઃ પઠેચ્છિવસંન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥ ૬ ॥

ઇતિ શ્રીમચ્છંકરાચાર્ય વિરચિતં શિવપંચાક્ષરસ્તોત્રં સંપૂર્ણમ્